# सिद्धान्तकौमुदी - ५

Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]**

Course Code – VK 117 **Schedule of offering:5**

**Course Credit Structure: [5]**

- **Lecture: [5]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [5]**

## 1. Introduction

व्याकरणशास्त्रस्य प्रतिपाद्येषु अंशेषु शब्दसिद्धिप्रक्रिया प्रधानभूता वर्तते । एकस्य शब्दस्य सिद्धौ अष्टाध्याय्याः विभिन्नेभ्यः प्रदेशेभ्यः सूत्राणि आदाय तेषु तेषु प्रसङ्गेषु कार्याणि करणीयानि भवन्ति । सैषा दुर्गमा विविधशब्दसिद्धिप्रक्रिया वैयाकरणप्रवरेण भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याख्ये ग्रन्थे सुगमतया बोधिता । अपि च बहुषु प्रदेशेषु सूत्रवार्तिकभाष्याणां मतेषु भेदे दृश्यमाने यथोचितं सर्वमतानुकूलः अन्यतममतानुकूलो वा पन्थाः अनुसरणीयो भवति यः अल्पमतिभिः ग्रहीतुं न शक्यते । भट्टोजिदीक्षितेन तादृशानि स्थलानि न्यक्षेण परिशील्य सिद्धान्तभूतः अर्थः स्वग्रन्थेऽस्मिन् प्रकाशितः । तस्मात् वैयाकरणप्रक्रियया साधुशब्दस्वरूपस्य निर्णये अयं ग्रन्थः नितरामुपकारकः वरीवर्ति ।

अत्र तिङन्तप्रक्रिया अध्याप्यते । तत्र उपकारकाणां व्याख्याभागानामपि यथोचितं बोधनं भविष्यति ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- शुद्धानां प्रत्ययान्तानां च धातूनां दशसु लकारेषु तिङन्तरूपाणि निष्पादयितुं समर्थाः भवेयुः
- अनुवृत्त्यादिज्ञानपूर्वकं सूत्रार्थावगमे तद्व्याख्याने च पाटवं प्राप्नुयुः

- प्रकृतग्रन्थभागं प्रतिपङ्क्ति अधीत्य कस्यापि भागस्य व्याख्याने समर्थाः भवेयुः

## 3. Pre-requisites

- प्रकृतग्रन्थभागोपयोगिन्याः अष्टाध्याय्याः धारणा
- इतः पूर्वतनस्य ग्रन्थभागस्य सम्यक् अध्ययनम्
- सन्धिकार्याणां समासानां च ज्ञानम्

## 4. Readings

- सिद्धान्तकौमुदी, मोतिलाल बनरसीदास, भागः - 3

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – भ्वादिप्रकरणम्** 35 sessions

**Objectives –**

- भ्वादिगणपठितानां धातूनां दशसु लकारेषु रुपाणां निष्पादनम्
- प्रकरणान्तर्गतानां सूत्राणामर्थस्य अवबोधः
- एतस्मिन् विभागे विद्यमानां सूत्राणां सुष्ठु व्याख्याने सामर्थ्यम्

**Topics –**

- भू सत्तायाम् इत्यारभ्य आ गणान्तात् सर्वे धातवः
- लडादयो दश लकाराः

**Module 2 – अदादिप्रकरणं, जुहोत्यादिप्रकरणं, दिवादिप्रकरणं च** 10 sessions

**Objectives –**

- लुक्-श्लु-श्यन्-विकरणानां धातूनां दशसु लकारेषु रूपाणि
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- अद् भक्षणे इत्यादयः
- हु दानादनयोः इत्यादयः
- दिवु क्रीडादिषु

**Module 3 – स्वादिप्रकरणं, तुदादिप्रकरणं च** 15 sessions

**Objectives –**

- श्नु-श-श्नम्-उ-श्नाविकरणानां चुरादीनां च धातूनां दशसु लकारेषु रूपाणि
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- स्वादयः, तुदादयः, रुधादयः, तनादयः, क्र्यादयः चुरादयश्च

**Module 4 – रुधादिप्रकरणं, तनादिप्रकरणं, क्र्यादिप्रकरणं, चुरादिप्रकरणं च** 15 sessions

**Objectives –**

- श्नमादयः विकरणप्रत्ययाः
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- हेतुमण्णिच्, मुण्डादिभ्यो णिच्
- स्वार्थे सन्, इच्छासन्
- क्रियासमभिहारे यङ् तस्य लुक् च

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः अत्रत्यानां सर्वेषां सूत्राणामर्थं, तल्लाभप्रकारं च सम्यक् ज्ञात्वा तैः लक्ष्यसंस्कारं च कृत्वा शुद्धानां प्रत्ययान्तानां च धातूनां तिङन्तरूपाणि निष्पादयितुं प्रभवः भविष्यन्ति । सूत्राणामर्थस्य, प्रक्रियायाः ग्रन्थस्थानां शास्त्रीयविचाराणां च मौखिकनिरूपणे समर्थाः भविष्यन्ति ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् — २० अङ्काः
- प्रस्तुतिः — १५ अङ्काः
- सत्रार्धपरीक्षा — २५ अङ्काः
- सत्रान्तपरिक्षा — ४० अङ्काः